कस्य वध होहे दि करपाद-प्रवेशनञ्चेति वर्णितं यथा "भीमोऽथ प्रथमं गत्वा रात्रौ च्छन्न उपाविशत्। मृगं हरिरिवादृश्यः समाकाङ्क्षत कीचकम्। कीचकश्चाप्यलङ्कृत्य यथाकाममुपागमत्। तां वेलां नर्त्तनागारं पाञ्चालीसङ्गमाशया। मन्यमानः स सङ्केतमागारं प्राविशत्ततः। प्रविश्य च स तद्वेश्म तमसा संवृतं महत्। पूर्व्वागतं ततस्तत्र भीममप्रतिमौजसम्। एकान्तावस्थितं चैनमाससाद सुदुर्म्मतिः। शयानं शयने तत्र मृत्युं सूतः पराम्टशत्। पतङ्गः पावकं दीप्तं सिंहं क्षुद्रपशुर्यथा। जाज्वल्यमानं कोपेन कृष्णाधर्षणजेन ह। उपसंगम्य चैवेनं कीचकः काममोहितः। हर्षोन्मथितचित्तात्मा स्मयमानोऽभ्यभाषत। प्रापितं ते मया वित्तं बहुरूपमनन्तकम्। त्वत्कृते धनरत्नाढ्यं दासीशतपरिच्छदम्। रूपलावण्ययुक्ताभिर्युवतीभिरलङ्कृतम्। गृहं सान्तःपुरं सुभ्रु! क्रीडारतिविराजितम्। तत् सर्व्वं त्वां समुद्दिश्य सहसा समुपागतः। आबालान्मां प्रशंसन्ति सर्व्वा गृहगताः स्त्रियः। सुवासा दर्शनीयश्च नान्योऽस्ति त्वादृशः पुमान्। भीम उवाच। दिष्ट्या त्वं दर्शनीयोऽसि दिष्ट्यात्मानं प्रशंससि। ईदृशस्तु त्वया स्पर्शः स्पृष्टपूर्व्वो न कर्हिचित्। स्पर्शं वेत्सि विदग्धस्त्वं कामधर्म्मविचक्षणः। स्त्रीणां प्रीतिकरो नान्यस्त्वत्समः पुरुषस्त्विह। वैशम्पायन उवाच।

इत्युक्त्वा तं महाबाहुर्भीमो भीमपराक्रमः। सहसोत्पत्य कौन्तेयः प्रहस्येदमुवाच ह। अद्य त्वां भगिनी पाप! कृष्यमाणं मया भुवि। द्रक्ष्यत्यद्रिप्रतीकाशं सिंहेनेव महाद्विपम्। निराबाधा त्वयि हते सैरिन्ध्री विचरिष्यति। सुखमेवं चरिष्यन्ति सैरिन्ध्र्याः पतयस्तथा। ततो जग्राह केशेषु माल्यवत्सु महाबलः। स केशेषु परामृष्टो बलेन बलिनां वरः। आक्षिप्य केशान् वेगेन बाह्वोर्जग्राह पाण्डवम्। बाहुयुद्धं तयोरासीत् क्रुद्धयोर्नरसिंहयोः। वसन्ते वासिताहेतोर्ब्बलवद्गजयोरिव। कीचकानान्तु मुख्यस्य नराणामुत्तमस्य च। बालिसुग्रीवयोर्भ्रात्रोः पुरेव कपिसिंहयोः"।

ततस्तयोर्युद्धमुपवर्ण्योक्तम् "मुहूर्त्तन्तु स तं वेगं सहित्वा भूरि दुःसहम्। बलादहीयत तदा सूतो भीमबलार्द्दितः। तं हीयमानं विज्ञाय भीमसेनो महाबलः। वक्षस्यानीय वेगेन ममर्द्दैनं विचेतसम्। क्रोधाविष्टो विनिश्वस्य पुनश्चैनं वृकोदरः। जग्राह जयतां श्रेष्ठः केशेष्वेव तदा भृशम्। गृहीत्वा कीचकं भीमो विरुराव महाबलः। शार्द्दूलः पिशिताकाङ्क्षी गृहीत्वेव महामृगम्। तत एनं परिश्रान्तमुपलभ्य वृकोदरः। योक्त्रयामास बाहुभ्यां पशुं रशनया यथा। नदन्तञ्च महानादं भिन्नभेरीसमस्वनम्। भ्रामयामास सुचिरं विस्फुरन्तमचेतसम्। प्रगृह्य तरसा दोर्भ्यां कण्ठं तस्य वृकोदरः। अपीडयत कृष्णायास्तदा कोपोपशान्तये। अथ तं भग्नसर्व्वाङ्गं व्याविद्धनयनाम्बरम्। आक्रम्य च कटीदेशे जानुना कीचकाधमम्। अपीडयत बाहुभ्यां पशुमारममारयत्। तं विषीदन्तमाज्ञाय कीचकं पाण्डुनन्दनः। भूतले भ्रामयामास वाक्यञ्चेदमुवाच ह। अद्याहमनृणो भूत्वा भ्रातुर्भार्य्यापहारिणम्। शान्तिं लब्धास्मि परमां हत्वा सैरिन्ध्रिकण्टकम्। इत्येवमुक्त्वा पुरुषप्रवीरस्तं कीचकं क्रोधसरागनेत्रः। आस्रस्तवस्त्राभरणं स्फुरन्तमङ्गान्तनेत्रं व्यसुमुत्ससर्ज्ज। निष्पिष्य पाणिना पाणिं सन्दष्टोष्ठपुटो बली। समाक्रम्य च संक्रुद्धो बलेन बलिनां वरः। तस्य पाणी च पादौ च शिरो ग्रीवाञ्च सर्व्वशः। काये प्रवेशयामास पशोरिव पिनाकधृक्। तं सम्मथितसर्व्वाङ्गं मांसपिण्डोपमं कृतम्। कृष्णायै दर्शयामास भीमसेनो महाबलः"।

**कीज** त्रि॰ किमस्य कथंजात इति वा पृषो॰। अद्भुते "यः शक्रो मृत्यो अस्त्रो यो वा कीजो हिरण्मयः" ऋ॰८।६६।२०। कीज इत्यद्भुतमाह" भा॰

**कीट** बन्धे वर्णे च चुरा॰ उभ॰ सक॰ सेट्। कीटयति ते अचीकिटत्–त। कीटयाम् बभूव आस चकार चक्रे कीटः।

**कीट** पु॰ कीट–अच्। कृमिभ्यः स्थूले क्षुद्रजन्तुभेदे। स्वार्थे क। तत्रार्थे २मागधजातौ च धरणिः। ३कठिने त्रि॰ मेदिनिः। कीटभेदलक्षणादिकं सुश्रुते दर्शितं यथा–"अथातः कीटकल्पं व्याख्यास्यामः। सर्पाणां शुक्रविण्मूत्रशवपूत्यण्डसम्भवाः। वाय्वग्न्यम्बुप्रकृतयः कीटास्तु विविधाः स्मृताः। सर्वेदोषप्रकृतिभिर्युक्तास्त्वापरिणामतः। कीटत्वेऽपि सुघोरास्ते सर्व्व एव चतुर्व्विधाः। कुम्भीनसस्तुण्डिकेरी शृङ्गी शतकुलीरकः। उच्चिटिङ्गोऽग्निनामा च विच्चिटिङ्गो मयूरिका। आवर्त्तकस्तथोरभ्रसारिकामुखवैदलौ। शरावकुर्द्दोऽभीराजी परुषश्चित्रशीर्षकः। शतबाहुश्च यश्चापि रक्तराजिः प्रकीर्त्तितः। अष्टादशेति वायव्याः कीटाः पवनकोपनाः। तैर्भवन्तीह दष्टानां रोगा वातनिमित्तजाः। कौण्डिल्यकः कणभको वरटी